*As per Challakere Brothers' chanting*

1. ॐ – श्रीमाता श्रीमहाराज्ञी श्रीमत् सिंहासनेश्वरी ।
ॐ – śhrīmātāśh' śhrīmahārāj'ñīśh' śhrīmat' siṁ'hāsanēśh'varī ।

2. चिदग्नि कुण्ड सम्भूता देवकार्य समुद्यता ।
chidag'ni kuṇ'ḍa sam'bhūtā dēvakār'ya samud'yatā ।

3. उद्यद्भानु सहस्राभा चतुर्बाहु समन्विता ।
ud'yad'bhānu sahas'rābhā chatur'bāhu saman'vitā ।

4. रागस्वरूप पाशाढ्या क्रोधाकाराङ्कुशोज्ज्वला ।
rāgas'varūpa pāśhāḍh'yāk' krōdhākārāṅ'kuśhōj'jvalā ।

5. मनोरूपेक्षु कोदण्डा पञ्चतन्मात्र सायका ।
manōrūpēk'ṣhu kōdaṇ'ḍā pañ'chatan'māt'ra sāyakā ।

6. निजारुण प्रभापूर मज्जद्ब्रह्माण्ड मण्डला ।
nijāruṇap' prabhāpūra maj'jad'bram'hāṇ'ḍa maṇ'ḍalā ।

7. चम्पकाशोक पुन्नाग सौगन्धिक लसत्कचा ।
cham'pakāśhōka pun'nāga saugan'dhika lasat'kachā ।

8. कुरुविन्दमणि श्रेणी कनत्कोटीर मण्डिता ।
kuruvin'damaṇiśh' śhrēṇī kanat'kōṭīra maṇ'ḍitā ।

9. अष्टमीचन्द्र विभ्राज दलिकस्थल शोभिता ।
aṣh'ṭamīchan'dra vibh'rāja dalikas'thala śhōbhitā ।

10. मुखचन्द्र कलङ्काभ मृगनाभि विशेषका ।
mukhachan'dra kalaṅ'kābha mṛganābhi viśhēṣhakā ।

11. वदनस्मर माङ्गल्य गृहतोरण चिल्लिका ।
vadanas'mara māṅ'gal'ya gṛhatōraṇa chil'likā ।

12. वक्त्रलक्ष्मी परीवाह चलन्मीनाभ लोचना ।
vak'tralak'ṣhmī parīvāha chalan'mīnābha lōchanā ।

13. नवचम्पक पुष्पाभ नासादण्ड विराजिता ।
navacham'paka puṣh'pābha nāsādaṇ'ḍa virājitā ।

14. ताराकान्ति तिरस्कारि नासाभरण भासुरा ।
tārākān'ti tiras'kāri nāsābharaṇa bhāsurā ।

15. कदम्बमञ्जरी क्लृप्त कर्णपूर मनोहरा ।
kadam’bamañ’jarī kḷp’ta kar’ṇapūra manōharā ।

16. ताटङ्क युगली भूत तपनोडुप मण्डला ।
tāṭaṅ’ka yugalī bhūta tapanōḍupa maṇ’ḍalā ।

17. पद्मराग शिलादर्श परिभावि कपोलभूः ।
pad’marāga śhilādar’śha paribhāvi kapōlabhū-ḥu ।

18. नवविद्रुम बिम्बश्री न्यक्कारि रदनच्छदा ।
navavid’ruma bim’baśh’rīn’ nyak’kāri radanach’chhadā ।

19. शुद्ध विद्याङ्कुराकार द्विजपङ्क्ति द्वयोज्ज्वला ।
śhud’dha vid’yāṅ’kurākārad’ dvijapaṅk’tid’ dvayōj’jvalā ।

20. कर्पूर वीटिकामोद समाकर्षद् दिगन्तरा ।
kar’pūra vīṭikāmōda samākar’ṣhad digan’tarā ।

21. निज सल्लाप माधुर्य विनिर्भर्त्सित कच्छपी ।
nija sal’lāpa mādhur’ya vinir’bhar’tsita kach’chhapī ।

22. मन्दस्मित प्रभापूर मज्जत्कामेश मानसा ।
man’das’mitap’ prabhāpūra maj’jat’kāmēśha mānasā ।

23. अनाकलित सादृश्य चुबुकश्री विराजिता ।
anākalita sādṛśh’ya chubukaśh’rī virājitā ।

24. कामेश बद्ध माङ्गल्य सूत्र शोभित कन्धरा ।
kāmēśha bad’dha māṅ’gal’ya sūt’ra śhōbhita kan’dharā ।

25. कनकाङ्गद केयूर कमनीय भुजान्विता ।
kanakāṅ’gada kēyūra kamanīya bhujān’vitā ।

26. रत्नग्रैवेय चिन्ताक लोल मुक्ता फलान्विता ।
rat’nag’raivēya chin’tāka lōla muk’tā phalān’vitā ।

27. कामेश्वर प्रेमरत्न मणि प्रतिपण स्तनी ।
kāmēśh’varap’ prēmarat’na maṇip’ pratipaṇas’ stanī ।

28. नाभ्यालवाल रोमालि लता फल कुचद्वयी ।
nābh’yālavāla rōmāli latā phala kuchad’vayī ।

29. लक्ष्यरोम लताधारता समुन्नेय मध्यमा ।
lak’ṣhyarōma latādhāratā samun’nēya madh’yamā ।

30. स्तनभार दलन्मध्य पट्टबन्ध वलित्रया ।
stanabhāra dalan'madh'ya paṭ'ṭaban'dha valit'rayā ।

31. अरुणारुण कौसुम्भ वस्त्र भास्वत् कटीतटी ।
aruṇāruṇa kausum'bha vas'tra bhās'vat' kaṭītaṭī ।

32. रत्न किङ्किणिका रम्य रशना दाम भूषिता ।
rat'na kiṅ'kiṇikā ram'ya raśhanā dāma bhūṣhitā ।

33. कामेश ज्ञात सौभाग्य मार्दवोरु द्वयान्विता ।
kāmēśhaj' jñāta saubhāg'ya mār'davōrud' dvayān'vitā ।

34. माणिक्य मकुटाकार जानुद्वय विराजिता ।
māṇik'ya makuṭākāra jānud'vaya virājitā ।

35. इन्द्रगोप परिक्षिप्त स्मरतूणाभ जङ्घिका ।
in'dragōpa parik'ṣhip'tas' smaratūṇābha jaṅ'ghikā ।

36. गूढगुल्फा कूर्मपृष्ठ जयिष्णु प्रपदान्विता ।
gūḍhagul'phā kūr'mapṛṣh'ṭha jayiṣh'ṇup' prapadān'vitā ।

37. नखदीधिति संछन्न नमज्जन तमोगुणा ।
nakha dīdhiti sañ'chhan'na namaj'jana tamōguṇā ।

38. पदद्वय प्रभाजाल पराकृत सरोरुहा ।
padad'vayap' prabhājāla parākṛta sarōruhā ।

39. शिञ्जान मणिमञ्जीर मण्डित श्री पदाम्बुजा ।
śhiñ'jāna maṇimañ'jīra maṇ'ḍitaśh' śhrī padām'bujā ।

40. मराली मन्दगमना महालावण्य शेवधिः ।
marālī man'dagamanā mahālāvaṇ'ya śhēvadhiḥi ।

41. सर्वारुणा , अनवद्याङ्गी सर्वाभरण भूषिता ।
sar'vāruṇā (a)navad'yāṅ'gī sar'vābharaṇa bhūṣhitā ।

42. शिव कामेश्वराङ्कस्था शिवा स्वाधीन वल्लभा ।
śhiva kāmēśh'varāṅ'kas'thā śhivās' svādhīna val'labhā ।

43. सुमेरु मध्य शृङ्गस्था श्रीमन्नगर नायिका ।
sumēru madh'ya śhṛṅ'gas'thāśh' śhrīman'nagara nāyikā ।

44. चिन्तामणि गृहान्तस्था पञ्च ब्रह्मासन स्थिता ।
chin'tāmaṇi gṛhān'tas'thā pañ'chab' bram'hāsanas' sthitā ।

www.saiveda.net

45. महापद्माटवी संस्था कदम्बवन वासिनी ।
mahāpad’māṭavī saṁ’sthā kadam’bavana vāsinī ।

46. सुधासागर मध्यस्था कामाक्षी कामदायिनी ।
sudhāsāgara madh’yas’thā kāmāk’ṣhī kāmadāyinī ।

47. देवर्षि गण संघात स्तूयमानात्म वैभवा ।
dēvar’ṣhi gaṇa saṅ’ghātas’ stūyamānāt’ma vaibhavā ।

48. भण्डासुर वधोद्युक्त शक्तिसेना समन्विता ।
bhaṇ’ḍāsura vadhōd’yuk’ta śhak’tisēnā saman’vitā ।

49. सम्पत्करी समारूढ सिन्धुर व्रज सेविता ।
sam’pat’karī samārūḍha sin’dhurav’ vraja sēvitā ।

50. अश्वारूढाधिष्ठिताश्व कोटि कोटिभिरावृता ।
aśh’vārūḍhādhiṣh’ṭhitāśh’va kōṭi kōṭibhirāvṛtā ।

51. चक्रराज रथारूढ सर्वायुध परिष्कृता ।
chak’rarāja rathārūḍha sar’vāyudha pariṣh’kṛtā ।

52. गेयचक्र रथारूढ मन्त्रिणी परिसेविता ।
gēyachak’ra rathārūḍha man’triṇī parisēvitā ।

53. किरिचक्र रथारूढ दण्डनाथा पुरस्कृता ।
kirichak’ra rathārūḍha daṇ’ḍanāthā puras’kṛtā ।

54. ज्वाला मालिनिकाक्षिप्त वह्निप्राकार मध्यगा ।
jvālā mālinikāk’ṣhip’ta van’hip’rākāra madh’yagā ।

55. भण्डसैन्य वधोद्युक्त शक्ति विक्रम हर्षिता ।
bhaṇ’ḍasain’ya vadhōd’yuk’ta śhak’ti vik’rama har’ṣhitā ।

56. नित्या पराक्रमाटोप निरीक्षण समुत्सुका ।
nit’yā parāk’ramāṭōpa nirīk’ṣhaṇa samut’sukā ।

57. भण्डपुत्र वधोद्युक्त बाला विक्रम नन्दिता ।
bhaṇ’ḍaput’ra vadhōd’yuk’ta bālā vik’rama nan’ditā ।

58. मन्त्रिण्यम्बा विरचित विषङ्ग वध तोषिता ।
man’triṇ’yam’bā virachita viṣhaṅ’ga vadha tōṣhitā ।

59. विशुक्र प्राणहरण वाराही वीर्य नन्दिता ।
viśhuk’rap’ prāṇaharaṇa vārāhī vīr’ya nan’ditā ।

www.saiveda.net

60. कामेश्वर मुखालोक कल्पित श्रीगणेश्वरा ।
kāmēśh'vara mukhālōka kal'pitaśh' śhrīgaṇēśh'varā |

61. महागणेश निर्भिन्न विघ्नयन्त्र प्रहर्षिता ।
mahāgaṇēśha nir'bhin'na vigh'nayan'trap' prahar'ṣhitā |

62. भण्डासुरेन्द्र निर्मुक्त शस्त्र प्रत्यस्त्र वर्षिणी ।
bhaṇ'ḍāsurēn'dra nir'muk'ta śhas'trap' prat'yas'tra var'ṣhiṇī |

63. कराङ्गुलि नखोत्पन्न नारायण दशाकृतिः ।
karāṅ'guli nakhōt'pan'na nārāyaṇa daśhākṛtiḥi |

64. महा पाशुपतास्त्राग्नि निर्दग्धासुर सैनिका ।
mahā pāśhupatās'trāg'ni nir'dag'dhāsura sainikā |

65. कामेश्वरास्त्र निर्दग्ध सभण्डासुर शून्यका ।
kāmēśh'varās'tra nir'dag'dha sabhaṇ'ḍāsura śhūn'yakā |

66. ब्रह्मोपेन्द्र महेन्द्रादि देव संस्तुत वैभवा ।
bram'hōpēn'dra mahēn'drādi dēva saṁ'stuta vaibhavā |

67. हर नेत्राग्नि संदग्ध काम सञ्जीवनौषधिः ।
hara nēt'rāg'ni san'dag'dha kāma sañ'jīvanauṣhadhiḥi |

68. श्रीमद्वाग्भव कूटैक स्वरूप मुख पङ्कजा ।
śhrīmad'vāg'bhava kūṭaikas' svarūpa mukha paṅ'kajā |

69. कण्ठाधः कटि पर्यन्त मध्यकूट स्वरूपिणी ।
kaṇ'ṭhādha[hk]' kaṭi par'yan'ta madh'yakūṭas' svarūpiṇī |

70. शक्ति कूटैकतापन्न कट्यधोभाग धारिणी ।
śhak'ti kūṭaikatāpan'na kaṭ'yadhōbhāga dhāriṇī |

71. मूल मन्त्रात्मिका मूलकूटत्रय कलेबरा ।
mūla man'trāt'mikā mūlakūṭat'raya kalēbarā |

72. कुलामृतैक रसिका कुलसंकेत पालिनी ।
kulāmṛtaika rasikā kulasaṅ'kēta pālinī |

73. कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी ।
kulāṅ'ganā kulān'tas'thā kaulinī kulayōginī |

74. अकुला समयान्तस्था समयाचार तत्परा ।
akulā samayān'tas'thā samayāchāra tat'parā |

www.saiveda.net

75. मूलाधारैक निलया ब्रह्मग्रन्थि विभेदिनी ।
mūlādhāraika nilayāb’ bram’hag’ran’thi vibhēdinī ।

76. मणि पूरान्तरुदिता विष्णुग्रन्थि विभेदिनी ।
maṇi pūrān’tarudita vish’ṇug’ran’thi vibhēdinī ।

77. आज्ञा चक्रान्तरालस्था रुद्रग्रन्थि विभेदिनी ।
āj’ñā chak’rān’tarālas’thā rud’rag’ran’thi vibhēdinī ।

78. सहस्रारम्बुजारूढा सुधा साराभिवर्षिणी ।
sahas’rārām’bujārūḍhā sudhā sārābhivar’ṣhiṇī ।

79. तटिल्लता समरुचिः षट्चक्रोपरि संस्थिता ।
taṭil’latā samaruchiṣh’ ṣhaṭ’chak’rōpari saṁ’sthitā ।

80. महासक्तिः कुण्डलिनी बिसतन्तु तनीयसी ।
mahāsak’ti[hk]’ kuṇ’ḍalinī bisatan’tu tanīyasī ।

81. भवानी भावनागम्या भवारण्य कुठारिका ।
bhavānī bhāvanāgam’yā bhavāraṇ’ya kuṭhārikā ।

82. भद्रप्रिया भद्रमूर्तिर् भक्त सौभाग्यदायिनी ।
bhad’rap’riyā bhad’ramūr’tir’ bhak’ta saubhāg’yadāyinī ।

83. भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा ।
bhak’tip’riyā bhak’tigam’yā bhak’tivaśh’yā bhayāpahā ।

84. शाम्भवी शारदाराध्या शर्वाणी शर्मदायिनी ।
śhām’bhavī śhāradārādh’yā śhar’vāṇī śhar’madāyinī ।

85. शाङ्करी श्रीकरी साध्वी शरच्चन्द्र निभानना ।
śhāṅ’karīśh’ śhrīkarī sādh’vī śharach’chan’dra nibhānanā ।

86. शातोदरी शान्तिमती निराधारा निरञ्जना ।
śhātōdarī śhān’timatī nirādhārā nirañ’janā ।

87. निर्लेपा निर्मला नित्या निराकारा निराकुला ।
nir’lēpā nir’malā nit’yā nirākārā nirākulā ।

88. निर्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा ।
nir’guṇā niṣh’kalā śhān’tā niṣh’kāmā nirupap’lavā ।

89. नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया ।
nit’yamuk’tā nir’vikārā niṣh’prapañ’chā nirāśh’rayā ।

www.saiveda.net

90. नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा ।
nit’yaśhud’dhā nit’yabud’dhā niravad’yā niran’tarā ।

91. निष्कारणा निष्कलङ्का निरुपाधिर् निरीश्वरा ।
niṣh’kāraṇā niṣh’kalaṅ’kā nirupādhir’ nirīśh’varā ।

92. नीरागा रागमथनी निर्मदा मदनाशिनी ।
nīrāgā rāgamathanī nir’madā madanāśhinī ।

93. निश्चिन्ता निरहंकारा निर्मोहा मोहनाशिनी ।
niśh’chin’tā nirahaṅ’kārā nir’mōhā mōhanāśhinī ।

94. निर्ममा ममताहन्त्री निष्पापा पापनाशिनी ।
nir’mamā mamatāhan’trī niṣh’pāpā pāpanāśhinī ।

95. निष्क्रोधा क्रोधशमनी निर्लोभा लोभनाशिनी ।
niṣh’krōdhāk’ krōdhaśhamanī nir’lōbhā lōbhanāśhinī ।

96. निःसंशया संशयघ्नी निर्भवा भवनाशिनी ।
nis’saṁ’śhayā saṁ’śhayagh’nī nir’bhavā bhavanāśhinī ।

97. निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी ।
nir’vikal’pā nirābādhā nir’bhēdā bhēdanāśhinī ।

98. निर्नाशा मृत्युमथनी निष्क्रिया निष्परिग्रहा ।
nir’nāśhā mṛt’yumathanī niṣh’kriyā niṣh’parig’rahā ।

99. निस्तुला नीलचिकुरा निरपाया निरत्यया ।
nis’tulā nīlachikurā nirapāyā nirat’yayā ।

100. दुर्लभा दुर्गमा दुर्गा दुःखहन्त्री सुखप्रदा ।
dur’labhā dur’gamā dur’gā du[hk]’khahan’trī sukhap’radā ।

101. दुष्टदूरा दुराचार शमनी दोषवर्जिता ।
duṣh’ṭadūrā durāchāra śhamanī dōṣhavar’jitā ।

102. सर्वज्ञा सान्द्रकरुणा समानाधिक वर्जिता ।
sar’vaj’ñā sān’drakaruṇā samānādhika var’jitā ।

103. सर्वशक्तिमयी सर्व मङ्गला सद्गतिप्रदा ।
sar’vaśhak’timayī sar’va maṅ’galā sad’gatip’radā ।

104. सर्वेश्वरी सर्वमयी सर्वमन्त्र स्वरूपिणी ।
sar’vēśh’varī sar’vamayī sar’vaman’tras’ svarūpiṇī ।

105. सर्वयन्त्रात्मिका सर्वतन्त्ररूपा मनोन्मनी ।

sar’va yan’trāt’mikā sar’va tan’trarūpā manōn’manī ।

106. माहेश्वरी महादेवी महालक्ष्मीर् मृडप्रिया ।

māhēśh’varī mahādēvī mahālak’ṣhmīr’ mṛḍap’riyā ।

107. महारूपा महापूज्या महापातक नाशिनी ।

mahārūpā mahāpūj’yā mahāpātaka nāśhinī ।

108. महामाया महासत्त्वा महाशक्तिर् महारतिः ।

mahāmāyā mahāsat’tvā mahāśhak’tir’ mahāratiḥ ।

109. महाभोगा महैश्वर्या महावीर्या महाबला ।

mahābhōgā mahaiśh’var’yā mahāvīr’yā mahābalā ।

110. महाबुद्धिर् महासिद्धिर् महायोगेश्वरेश्वरी ।

mahābud’dhir’ mahāsid’dhir’ mahāyōgēśh’varēśh’varī ।

111. महातन्त्रा महामन्त्रा महायन्त्रा महासना ।

mahātan’trā mahāman’trā mahāyan’trā mahāsanā ।

112. महायाग क्रमाराध्या महाभैरव पूजिता ।

mahāyāgak’ kramārādh’yā mahābhairava pūjitā ।

113. महेश्वर महाकल्प महाताण्डव साक्षिणी ।

mahēśh’vara mahākal’pa mahātāṇ’ḍava sāk’ṣhiṇī ।

114. महाकामेश महिषी महात्रिपुर सुन्दरी ।

mahākāmēśha mahiṣhī mahāt’ripura sun’darī ।

115. चतुष् षष्ट्युपचाराढ्या चतुष् षष्टिकलामयी ।

chatuṣh’ ṣhaṣh’ṭyupachārāḍh’yā chatuṣh’ ṣhaṣh’ṭikalāmayī ।

116. महाचतुः षष्टिकोटि योगिनी गणसेविता ।

mahāchatuṣh’ ṣhaṣh’ṭikōṭi yōginī gaṇasēvitā ।

117. मनुविद्या चन्द्रविद्या चन्द्रमण्डल मध्यगा ।

manuvid’yā chan’dravid’yā chan’draman’ḍala madh’yagā ।

118. चारुरूपा चारुहासा चारुचन्द्र कलाधरा ।

chārurūpā chāruhāsā chāruchan’dra kalādharā ।

119. चराचर जगन्नाथा चक्रराज निकेतना ।

charāchara jagan’nāthā chak’rarāja nikētanā ।

www.saiveda.net

120. पार्वती पद्मनयना पद्मराग समप्रभा ।
pār’vatī pad’manayanā pad’marāga samap’rabhā ।

121. पञ्च प्रेतासनासीना पञ्चब्रह्म स्वरूपिणी ।
pañ’chap’ prētāsanāsīnā pañ’chab’ram’has’ svarūpiṇī ।

122. चिन्मयी परमानन्दा विज्ञान घनरूपिणी ।
chin’mayī paramānan’dā vij’ñāna ghanarūpiṇī ।

123. ध्यान ध्यातृ ध्येयरूपा धर्माधर्म विवर्जिता ।
dhyānad’ dhyātṛd’ dhyēyarūpā dhar’mādhar’ma vivar’jitā ।

124. विश्वरूपा जागरिणी स्वपन्ती तैजसात्मिका ।
viśh’varūpā jāgariṇīs’ svapan’tī taijasāt’mikā ।

125. सुप्ता प्राज्ञात्मिका तुर्या सर्वावस्था विवर्जिता ।
sup’tāp’ prāj’ñāt’mikā tur’yā sar’vāvas’thā vivar’jitā ।

126. सृष्टिकर्त्री ब्रह्मरूपा गोप्त्री गोविन्दरूपिणी ।
sṛṣh’ṭikar’trīb’ bram’harūpā gōp’trī gōvin’darūpiṇī ।

127. संहारिणी रुद्ररूपा तिरोधान करीश्वरी ।
saṁ’hāriṇī rud’rarūpā tirōdhāna karīśh’varī ।

128. सदाशिवाऽनुग्रहदा पञ्चकृत्य परायणा ।
sadāśhivā (a)nug’rahadā pañ’chakṛt’ya parāyaṇā ।

129. भानुमण्डल मध्यस्था भैरवी भगमालिनी ।
bhānuman’ḍala madh’yas’thā bhairavī bhagamālinī ।

130. पद्मासना भगवती पद्मनाभ सहोदरी ।
pad’māsanā bhagavatī pad’manābha sahōdarī ।

131. उन्मेष निमिषोत्पन्न विपन्न भुवनावलिः ।
un’mēṣha nimiṣhōt’pan’na vipan’na bhuvanāvaliḥi ।

132. सहस्र शीर्षवदना सहस्राक्षी सहस्रपात् ।
sahas’ra śhīr’ṣhavadanā sahas’rāk’ṣhī sahas’rapā-te ।

133. आब्रह्म कीट जननी वर्णाश्रम विधायिनी ।
āb’ram’ha kīṭa jananī var’ṇāśh’rama vidhāyinī ।

134. निजाज्ञारूप निगमा पुण्यापुण्य फलप्रदा ।
nijāj’ñārūpa nigamā puṇ’yāpuṇ’ya phalap’radā ।

135. श्रुतिं सीमन्त सिन्दूरीं कृत पादाब्ज धूलिका ।
śhruti sīman'ta sin'dūrī kṛta pādāb'ja dhūlikā ।

136. सकलागम सन्दोह शुक्ति सम्पुट मौक्तिका ।
sakalāgama san'dōha śhuk'ti sam'puṭa mauk'tikā ।

137. पुरुषार्थप्रदा पूर्णा भोगिनी भुवनेश्वरी ।
puruṣhār'thap'radā pūr'ṇā bhōginī bhuvanēśh'varī ।

138. अम्बिकाऽनादि निधना हरिब्रह्मेन्द्र सेविता ।
am'bikā (a)nādi nidhanā harib'ram'hēn'dra sēvitā ।

139. नारायणी नादरूपा नामरूप विवर्जिता ।
nārāyaṇī nādarūpā nāmarūpa vivar'jitā ।

140. ह्रींकारी ह्रीमती हृद्या हेयोपादेय वर्जिता ।
hrīṅ'kārīh' hrīmatī hṛd'yā hēyōpādēya var'jitā ।

141. राजराजार्चिता राज्ञी रम्या राजीवलोचना ।
rājarājār'chitā rāj'ñī ram'yā rājīvalōchanā ।

142. रञ्जनी रमणी रस्या रणत्किङ्किणि मेखला ।
rañ'janī ramaṇī ras'yā raṇat'kiṅ'kiṇi mēkhalā ।

143. रमा राकेन्दुवदना रतिरूपा रतिप्रिया ।
ramā rākēn'duvadanā ratirūpā ratip'riyā ।

144. रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा ।
rak'ṣhākarī rāk'ṣhasagh'nī rāmā ramaṇalam'paṭā ।

145. काम्या कामकलारूपा कदम्ब कुसुमं प्रिया ।
kām'yā kāmakalārūpā kadam'ba kusumap' priyā ।

146. कल्याणी जगतीकन्दा करुणा रस सागरा ।
kal'yāṇī jagatīkan'dā karuṇā rasa sāgarā ।

147. कलावती कलालापा कान्ता कादम्बरीप्रिया ।
kalāvatī kalālāpā kān'tā kādam'barīp'riyā ।

148. वरदा वामनयना वारुणी मद विह्वला ।
varadā vāmanayanā vāruṇī mada vih'valā ।

149. विश्वाधिका वेदवेद्या विन्ध्याचल निवासिनी ।
viśh'vādhikā vēdavēd'yā vin'dhyāchala nivāsinī ।

150. विधात्री वेदजननी विष्णुमाया विलासिनी ।
vidhāt'rī vēdajananī viṣh'ṇumāyā vilāsinī |

151. क्षेत्रस्वरूपा क्षेत्रेशी क्षेत्र क्षेत्रज्ञ पालिनी ।
kṣhēt'ras'varūpāk' kṣhēt'rēśhīk' kṣhēt'rak' kṣhēt'raj'ña pālinī |

152. क्षयवृद्धि विनिर्मुक्ता क्षेत्रपाल समर्चिता ।
kṣhayavṛd'dhi vinir'muk'tāk' kṣhēt'rapāla samar'chitā |

153. विजया विमला वन्द्या वन्दारु जन वत्सला ।
vijayā vimalā van'dyā van'dāru jana vat'salā |

154. वाग्वादिनी वामकेशी वह्निमण्डल वासिनी ।
vāg'vādinī vāmakēśhī van'himaṇ'ḍala vāsinī |

155. भक्तिमत् कल्पलतिका पशुपाश विमोचिनी ।
bhak'timat' kal'palatikā paśhupāśha vimōchinī |

156. संहृताशेष पाषण्डा सदाचार प्रवर्तिका ।
saṁ'hṛtāśhēṣha pāṣhaṇ'ḍā sadāchārap' pravar'tikā |

157. तापत्रयाग्नि सन्तप्त समाह्लादन चन्द्रिका ।
tāpat'rayāg'ni san'tap'ta samāh'lādana chan'drikā |

158. तरुणी तापसाराध्या तनुमध्या तमोपहा ।
taruṇī tāpasārādh'yā tanumadh'yā tamōpahā |

159. चितिस् तत्पद लक्ष्यार्था चिदेकरस रूपिणी ।
chitis' tat'pada lak'ṣhyār'thā chidēkarasa rūpiṇī |

160. स्वात्मानन्द लवीभूत ब्रह्माद्यानन्द सन्ततिः ।
svāt'mānan'da lavībhūtab' bram'hād'yānan'da san'tatiḥi |

161. परा प्रत्यक्चितीरूपा पश्यन्ती परदेवता ।
parāp' prat'yak'chitīrūpā paśh'yan'tī paradēvatā |

162. मध्यमा वैखरीरूपा भक्त मानस हंसिका ।
madh'yamā vaikharīrūpā bhak'ta mānasa haṁ'sikā |

163. कामेश्वर प्राणनाडी कृतज्ञा कामपूजिता ।
kāmēśh'varap' prāṇanāḍī kṛtaj'ñā kāmapūjitā |

164. शृङ्गार रस सम्पूर्णा जया जालन्धरस्थिता ।
śhṛṅ'gāra rasa sam'pūr'ṇā jayā jālan'dharas'thitā |

www.saiveda.net

165. ओड्याणपीठ निलया बिन्दु मण्डलवासिनी ।
ōḍ’yāṇapīṭha nilayā bin’du maṇ’ḍalavāsinī ।

166. रहोयाग क्रमाराध्या रहस्तर्पण तर्पिता ।
rahōyāgak’ kramārādh’yā rahas’tar’paṇa tar’pitā ।

167. सद्यः प्रसादिनी विश्व साक्षिणी साक्षिवर्जिता ।
sad’ya[fp]’ prasādinī viśh’va sāk’ṣhiṇī sāk’ṣhivar’jitā ।

168. षडङ्गदेवता युक्ता षाड्गुण्य परिपूरिता ।
ṣhaḍaṅ’gadēvatā yuk’tā ṣhāḍ’guṇ’ya paripūritā ।

169. नित्यक्लिन्ना निरुपमा निर्वाण सुख दायिनी ।
nit’yak’lin’nā nirupamā nir’vāṇa sukha dāyinī ।

170. नित्या षोडशिका रूपा श्रीकण्ठार्ध शरीरिणी ।
nit’yā ṣhōḍaśhikā rūpāśh’ śhrīkaṇ’ṭhār’dha śharīriṇī ।

171. प्रभावती प्रभारूपा प्रसिद्धा परमेश्वरी ।
prabhāvatīp’ prabhārūpāp’ prasid’dhā paramēśh’varī ।

172. मूलप्रकृतिरव्यक्ता व्यक्ताव्यक्त स्वरूपिणी ।
mūlap’rakṛtirav’yak’tāv’ vyak’tāv’yak’tas’ svarūpiṇī ।

173. व्यापिनी विविधाकारा विद्याविद्या स्वरूपिणी ।
vyāpinī vividhākārā vid’yāvid’yās’ svarūpiṇī ।

174. महाकामेश नयन कुमुदाह्लाद कौमुदी ।
mahākāmēśha nayana kumudāh’lāda kaumudī ।

175. भक्त हार्द तमोभेद भानुमद्भानु सन्ततिः ।
bhak’ta hār’da tamōbhēda bhānumad’bhānu san’tatiḥi ।

176. शिवदूती शिवाराध्या शिवमूर्तिः शिवङ्करी ।
śhivadūtī śhivārādh’yā śhivamūr’tiśh’ śhivaṅ’karī ।

177. शिवप्रिया शिवपरा शिष्टेष्टा शिष्टपूजिता ।
śhivap’riyā śhivaparā śhiṣh’ṭēṣh’ṭā śhiṣh’ṭapūjitā ।

178. अप्रमेया स्वप्रकाशा मनोवाचामगोचरा ।
ap’ramēyās’ svap’rakāśhā manōvāchāmagōcharā ।

179. चिच्छक्तिश् चेतनारूपा जडशक्तिर् जडात्मिका ।
chich’chhak’tiśh’ chētanārūpā jaḍaśhak’tir’ jaḍāt’mikā ।

180. गायत्री व्याहृतिः सन्ध्या द्विजबृन्द निषेविता ।
gāyat'rīv' vyāhṛtis' san'dhyād' dvijabṛn'da nishēvitā |

181. तत्त्वासना तत् त्वमयी पञ्च कोशान्तरस्थिता ।
tat'tvāsanā tat' tvamayī pañ'cha kōśhān'taras'thitā |

182. निस्सीम महिमा नित्य यौवना मदशालिनी ।
nis'sīma mahimā nit'ya yauvanā madaśhālinī |

183. मदघूर्णित रक्ताक्षी मदपाटल गण्डभूः ।
madaghūr'ṇita rak'tāk'ṣhī madapāṭala gaṇ'ḍabhū-ḥu |

184. चन्दन द्रव दिग्धाङ्गी चाम्पेय कुसुम प्रिया ।
chan'danad' drava dig'dhāṅ'gī chām'pēya kusumap' priyā |

185. कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी ।
kuśhalā kōmalākārā kurukul'lā kulēśh'varī |

186. कुलकुण्डालया कौल मार्ग तत्पर सेविता ।
kulakuṇ'ḍālayā kaula mār'ga tat'para sēvitā |

187. कुमार गणनाथाम्बा तुष्टिः पुष्टिर् मतिर् धृतिः ।
kumāra gaṇanāthām'bā tuṣh'ṭi[fp]' puṣh'ṭir' matir' dhṛtiḥi |

188. शान्तिः स्वस्तिमती कान्तिर् नन्दिनी विघ्ननाशिनी ।
śhān'tis' svas'timatī kān'tir' nan'dinī vigh'nanāśhinī |

189. तेजोवती त्रिनयना लोलाक्षी कामरूपिणी ।
tējōvatīt' trinayanā lōlāk'ṣhī kāmarūpiṇī |

190. मालिनी हंसिनी माता मलयाचल वासिनी ।
mālinī haṁ'sinī mātā malayāchala vāsinī |

191. सुमुखी नलिनी सुभ्रूः शोभना सुरनायिका ।
sumukhī nalinī subh'rūśh' śhōbhanā suranāyikā |

192. कालकण्ठी कान्तिमती क्षोभिणी सूक्ष्मरूपिणी ।
kālakaṇ'ṭhī kān'timatīk' kṣhōbhiṇī sūk'ṣhmarūpiṇī |

193. वज्रेश्वरी वामदेवी वयोवस्था विवर्जिता ।
vaj'rēśh'varī vāmadēvī vayōvas'thā vivar'jitā |

194. सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्विनी ।
sid'dhēśh'varī sid'dhavid'yā sid'dhamātā yaśhas'vinī |

195. विशुद्धचक्र निलयाऽरक्तवर्णा त्रिलोचना ।
viśhud'dhachak'ra nilayā (a)rak'tavar'ṇāt' trilōchanā ।

196. खट्वाङ्गादि प्रहरणा वदनैक समन्विता ।
khaṭ'vāṅ'gādip' praharaṇā vadanaika saman'vitā ।

197. पायसान्नप्रिया त्वक्स्था पशुलोक भयङ्करी ।
pāyasān'nap'riyāt' tvak'sthā paśhulōka bhayaṅ'karī ।

198. अमृतादि महाशक्ति संवृता डाकिनीश्वरी ।
amṛtādi mahāśhak'ti saṁ'vṛtā ḍākinīśh'varī ।

199. अनाहताब्ज निलया श्यामाभा वदनद्वया ।
anāhatāb'ja nilayāśh' śhyāmābhā vadanad'vayā ।

200. दंष्ट्रोज्वलाऽक्ष मालादि धरा रुधिरसंस्थिता ।
daṁṣh'ṭrōj'jvalā (a)k'ṣha mālādi dharā rudhirasaṁ'sthitā ।

201. कालरात्र्यादि शक्त्यौघ वृता स्निग्धौदनप्रिया ।
kālarāt'ryādi śhak'tyaugha vṛtās' snig'dhaudanap'riyā ।

202. महावीरेन्द्र वरदा राकिण्यम्बा स्वरूपिणी ।
mahāvīrēn'dra varadā rākiṇ'yam'bās' svarūpiṇī ।

203. मणिपूराब्ज निलया वदनत्रय संयुता ।
maṇipūrāb'ja nilayā vadanat'raya sañ'yutā ।

204. वज्रादिकायुधोपेता डामर्यादिभिरावृता ।
vaj'rādikāyudhōpētā ḍāmar'yādibhirāvṛtā ।

205. रक्तवर्णा मांसनिष्ठा गुडान्न प्रीत मानसा ।
rak'tavar'ṇā māṁ'saniṣh'ṭhā guḍān'nap' prīta mānasā ।

206. समस्तभक्त सुखदा लाकिन्यम्बा स्वरूपिणी ।
samas'tabhak'ta sukhadā lākin'yam'bās' svarūpiṇī ।

207. स्वाधिष्ठानाम्बुज गता चतुर्वक्त्र मनोहरा ।
svādhiṣh'ṭhānām'buja gatā chatur'vak'tra manōharā ।

208. शूलाद्यायुध सम्पन्ना पीतवर्णाऽतिगर्विता ।
śhūlād'yāyudha sam'pan'nā pītavar'ṇā (a)tigar'vitā ।

209. मेदोनिष्ठा मधुप्रीता बन्धिन्यादि समन्विता ।
mēdōniṣh'ṭhā madhup'rītā ban'dhin'yādi saman'vitā ।

210. दध्यन्नासक्त हृदया काकिनी रूप धारिणी ।
dadh’yan’nāsak’ta hṛdayā kākinī rūpa dhāriṇī ।

211. मूलाधाराम्बुजारूढा पञ्च वक्त्राऽस्थि संस्थिता ।
mūlādhārām’bujārūḍhā pañ’cha vak’trā (a)s’thi saṁ’sthitā ।

212. अङ्कुशादि प्रहरणा वरदादि निषेविता ।
aṅ’kuśhādip’ praharaṇā varadādi niṣhēvitā ।

213. मुद्गौदनासक्त चित्ता साकिन्यम्बा स्वरूपिणी ।
mud’gaudanāsak’ta chit’tā sākin’yam’bās’ svarūpiṇī ।

214. आज्ञा चक्राब्ज निलया शुक्लवर्णा षडानना ।
āj’ñā chak’rāb’ja nilayā śhuk’lavar’ṇā ṣhaḍānanā ।

215. मज्जासंस्था हंसवती मुख्य शक्ति समन्विता ।
maj’jāsaṁ’sthā haṁ’savatī mukh’ya śhak’ti saman’vitā ।

216. हरिद्रान्नैक रसिका हाकिनी रूप धारिणी ।
harid’rān’naika rasikā hākinī rūpa dhāriṇī ।

217. सहस्रदल पद्मस्था सर्व वर्णोप शोभिता ।
sahas’radala pad’mas’thā sar’va var’ṇōpa śhōbhitā ।

218. सर्वायुधधरा शुक्ल संस्थिता सर्वतोमुखी ।
sar’vāyudhadharā śhuk’la saṁ’sthitā sar’vatōmukhī ।

219. सर्वौदन प्रीतचित्ता याकिन्यम्बा स्वरूपिणी ।
sar’vaudanap’ prītachit’tā yākin’yam’bās’ svarūpiṇī ।

220. स्वाहा स्वधाऽमतिर् मेधा श्रुतिः स्मृतिर् अनुत्तमा ।
svāhās’ svadhā (a)matir’ mēdhāśh’ śhrutis’ smṛtiranut’tamā ।

221. पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवण कीर्तना ।
puṇ’yakīr’ti[fp]’ puṇ’yalabh’yā puṇ’yaśh’ravaṇa kīr’tanā ।

222. पुलोमजार्चिता बन्ध मोचनी बन्धुरालका ।
pulōmajār’chitā ban’dha mōchanī bandhurālakā ।

223. विमर्शरूपिणी विद्या वियदादि जगत्प्रसूः ।
vimar’śharūpiṇī vid’yā viyadādi jagat’prasū-ḥu ।

224. सर्वव्याधि प्रशमनी सर्वमृत्यु निवारिणी ।
sar’vav’yādhip’ praśhamanī sar’vamṛt’yu nivāriṇī ।

www.saiveda.net

225. अग्रगण्याऽचिन्त्यरूपा कलिकल्मष नाशिनी ।
ag’ragaṇ’yā (a)chin’tyarūpā kalikal’maṣha nāśhinī ।

226. कात्यायनी कालहन्त्री कमलाक्ष निषेविता ।
kāt’yāyanī kālahan’trī kamalāk’ṣha niṣhēvitā ।

227. ताम्बूल पूरित मुखी दाडिमी कुसुमं प्रभा ।
tām’būla pūrita mukhī dāḍimī kusumap’ prabhā ।

228. मृगाक्षी मोहिनी मुख्या मृडानी मित्ररूपिणी ।
mṛgāk’ṣhī mōhinī mukh’yā mṛḍānī mit’rarūpiṇī ।

229. नित्यतृप्ता भक्तनिधिर् नियन्त्री निखिलेश्वरी ।
nit’yatṛp’tā bhak’tanidhir’ niyan’trī nikhilēśh’varī ।

230. मैत्र्यादि वासनालभ्या महाप्रलय साक्षिणी ।
mait’ryādi vāsanālabh’yā mahāp’ralaya sāk’ṣhiṇī ।

231. परा शक्तिः परा निष्ठा प्रज्ञानघन रूपिणी ।
parā śhak’ti[fp]’ parā niṣh’ṭhāp’ praj’ñānaghana rūpiṇī ।

232. माध्वीपानालसा मत्ता मातृका वर्ण रूपिणी ।
mādh’vīpānālasā mat’tā mātṛkā var’ṇa rūpiṇī ।

233. महाकैलास निलया मृणाल मृदु दोर्लता ।
mahākailāsa nilayā mṛṇāla mṛdu dōr’latā ।

234. महनीया दयामूर्तिर् महासाम्राज्य शालिनी ।
mahanīyā dayāmūr’tir’ mahāsām’rāj’ya śhālinī ।

235. आत्मविद्या महाविद्या श्रीविद्या कामसेविता ।
āt’mavid’yā mahāvid’yāśh’ śhrīvid’yā kāmasēvitā ।

236. श्री षोडशाक्षरी विद्या त्रिकूटा कामकोटिका ।
śhrī ṣhōḍaśhāk’ṣharī vid’yāt’ trikūṭā kāmakōṭikā ।

237. कटाक्ष किङ्करी भूत कमला कोटि सेविता ।
kaṭāk’ṣha kiṅ’karī bhūta kamalā kōṭi sēvitā ।

238. शिरस्स्थिता चन्द्रनिभा भालस्थेन्द्र धनुः प्रभा ।
śhiras’sthitā chan’dranibhā bhālas’thēn’dra dhanu[fp]’ prabhā ।

239. हृदयस्था रविप्रख्या त्रिकोणान्तर दीपिका ।
hṛdayas’thā ravip’rakh’yāt’ trikōṇān’tara dīpikā ।

240. दाक्षायणी दैत्यहन्त्री दक्षयज्ञ विनाशिनी ।
dāk’ṣhāyaṇī dait’yahan’trī dak’ṣhayaj’ña vināśhinī ।

241. दरान्दोलित दीर्घाक्षी दर हासोज्ज्वलन् मुखी ।
darān’dōlita dīr’ghāk’ṣhī dara hāsōj’jvalan’ mukhī ।

242. गुरुमूर्तिर् गुणनिधिर् गोमाता गुहजन्मभूः ।
gurumūr’tir’ guṇanidhir’ gōmātā guhajan’mabhū-ḥu ।

243. देवेशी दण्डनीतिस्था दहराकाश रूपिणी ।
dēvēśhī daṇ’ḍanītis’thā daharākāśha rūpiṇī ।

244. प्रतिपन्मुख्य राकान्त तिथि मण्डल पूजिता ।
pratipan’mukh’ya rākān’ta tithi maṇ’ḍala pūjitā ।

245. कलात्मिका कलानाथा काव्यालाप विनोदिनी ।
kalāt’mikā kalānāthā kāv’yālāpa vinōdinī ।

246. सचामर रमा वाणी सव्य दक्षिण सेविता ।
sachāmara ramā vāṇī sav’ya dak’ṣhiṇa sēvitā ।

247. आदिशक्तिरमेयाऽऽत्मा परमा पावनाकृतिः ।
ādiśhak’tiramēyā (ā)t’mā paramā pāvanākṛtiḥi ।

248. अनेककोटि ब्रह्माण्ड जननी दिव्यविग्रहा ।
anēkakōṭib’ bram’hāṇ’ḍa jananī div’yavig’rahā ।

249. क्लींकारी केवला गुह्या कैवल्य पददायिनी ।
klīṅ’kārī kēvalā guh’yā kaival’ya padadāyinī ।

250. त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्तिस् त्रिदशेश्वरी ।
tripurāt’ trijagad’van’dyāt’ trimūr’tis’ tridaśhēśh’varī ।

251. त्र्यक्षरी दिव्य गन्धाढ्या सिन्दूर तिलकाञ्चिता ।
tryak’ṣharī div’ya gan’dhāḍh’yā sin’dūra tilakāñ’chitā ।

252. उमा शैलेन्द्रतनया गौरी गन्धर्व सेविता ।
umā śhailēn’dratanayā gaurī gan’dhar’va sēvitā ।

253. विश्वगर्भा स्वर्णगर्भा , अवरदा वागधीश्वरी ।
viśh’vagar’bhās’ svar’ṇagar’bhā (a)varadā vāgadhīśh’varī ।

254. ध्यानगम्याऽपरिच्छेद्या ज्ञानदा ज्ञानविग्रहा ।
dhyānagam’yā (a)parich’chhēd’yāj’ jñānadāj’ jñānavig’rahā ।

255. सर्ववेदान्त संवेद्या सत्यानन्द स्वरूपिणी ।
sar'vavēdān'ta saṁ'vēd'yā sat'yānan'das' svarūpiṇī ।

256. लोपामुद्रार्चिता लीला क्लृप्त ब्रह्माण्ड मण्डला ।
lōpāmud'rār'chitā līlā kḷp'tab' bram'hāṇ'ḍa maṇ'ḍalā ।

257. अदृश्या दृश्यरहिता विज्ञात्री वेद्यवर्जिता ।
adṛśh'yā dṛśh'yarahitā vij'ñāt'rī vēd'yavar'jitā ।

258. योगिनी योगदा योग्या योगानन्दा युगन्धरा ।
yōginī yōgadā yōg'yā yōgānan'dā yugan'dharā ।

259. इच्छाशक्ति ज्ञानशक्ति क्रियाशक्ति स्वरूपिणी ।
ich'chhāśhak'tij' jñānaśhak'tik' kriyāśhak'tis' svarūpiṇī ।

260. सर्वाधारा सुप्रतिष्ठा सदसद्रूप धारिणी ।
sar'vādhārā sup'ratiṣh'ṭhā sadasad'rūpa dhāriṇī ।

261. अष्टमूर्तिरजाजैत्री लोकयात्रा विधायिनी ।
aṣh'ṭamūr'tirajājait'rī lōkayāt'rā vidhāyinī ।

262. एकाकिनी भूमरूपा निर्द्वैता द्वैतवर्जिता ।
ēkākinī bhūmarūpā nir'dvaitād' dvaitavar'jitā ।

263. अन्नदा वसुदा वृद्धा ब्रह्मात्मैक्य स्वरूपिणी ।
an'nadā vasudā vṛd'dhāb' bram'hāt'maik'yas' svarūpiṇī ।

264. बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दा बलिप्रिया ।
bṛhatīb' brām'haṇīb' brām'hīb' bram'hānan'dā balip'riyā ।

265. भाषारूपा बृहत्सेना भावाभाव विवर्जिता ।
bhāṣhārūpā bṛhat'sēnā bhāvābhāva vivar'jitā ।

266. सुखाराध्या शुभकरी शोभना सुलभा गतिः ।
sukhārādh'yā śhubhakarī śhōbhanā sulabhā gatiḥi ।

267. राज राजेश्वरी राज्य दायिनी राज्य वल्लभा ।
rāja rājēśh'varī rāj'ya dāyinī rāj'ya val'labhā ।

268. राजत्कृपा राजपीठ निवेशित निजाश्रिता ।
rājat'kṛpā rājapīṭha nivēśhita nijāśh'ritā ।

269. राज्यलक्ष्मीः कोशनाथा चतुरङ्ग बलेश्वरी ।
rāj'yalak'ṣhmī[hk]' kōśhanāthā chaturaṅ'ga balēśh'varī ।

www.saiveda.net

270. साम्राज्य दायिनी सत्यसन्धा सागरमेखला ।
sām'rāj'ya dāyinī sat'yasan'dhā sāgaramēkhalā |

271. दीक्षिता दैत्यशमनी सर्वलोक वशङ्करी ।
dīk'ṣhitā dait'yaśhamanī sar'valōka vaśhaṅ'karī |

272. सर्वार्थदात्री सावित्री सच्चिदानन्द रूपिणी ।
sar'vār'thadāt'rī sāvit'rī sach'chidānan'da rūpiṇī |

273. देश कालापरिच्छिन्ना सर्वगा सर्वमोहिनी ।
dēśha kālāparich'chhin'nā sar'vagā sar'vamōhinī |

274. सरस्वती शास्त्रमयी गुहाम्बा गुह्यरूपिणी ।
saras'vatī śhās'tramayī guhām'bā guh'yarūpiṇī |

275. सर्वोपाधि विनिर्मुक्ता सदाशिव पतिव्रता ।
sar'vōpādhi vinir'muk'tā sadāśhiva pativ'ratā |

276. सम्प्रदायेश्वरी साध्वी गुरुमण्डल रूपिणी ।
sam'pradāyēśh'varī sādh'vī guruman'ḍala rūpiṇī |

277. कुलोत्तीर्णा भगाराध्या माया मधुमती मही ।
kulōt'tīr'ṇā bhagārādh'yā māyā madhumatī mahī |

278. गणाम्बा गुह्यकाराध्या कोमलाङ्गी गुरुप्रिया ।
gaṇām'bā guh'yakārādh'yā kōmalāṅ'gī gurup'riyā |

279. स्वतन्त्रा सर्वतन्त्रेशी दक्षिणामूर्ति रूपिणी ।
svatan'trā sar'vatan'trēśhī dak'ṣhiṇāmūr'ti rūpiṇī |

280. सनकादि समाराध्या शिवज्ञान प्रदायिनी ।
sanakādi samārādh'yā śhivaj'ñānap' pradāyinī |

281. चित्कलाऽऽनन्द कलिका प्रेमरूपा प्रियङ्करी ।
chit'kalā (ā)nan'da kalikāp' prēmarūpāp' priyaṅ'karī |

282. नामपारायण प्रीता नन्दिविद्या नटेश्वरी ।
nāmapārāyaṇap' prītā nan'divid'yā naṭēśh'varī |

283. मिथ्या जगदधिष्ठाना मुक्तिदा मुक्तिरूपिणी ।
mith'yā jagadadhiṣh'ṭhānā muk'tidā muk'tirūpiṇī |

284. लास्यप्रिया लयकरी लज्जा रम्भादिवन्दिता ।
lās'yap'riyā layakarī laj'jā ram'bhādivan'ditā |

www.saiveda.net

285. भवदाव सुधावृष्टिः पापारण्य दवानला ।
bhavadāva sudhāvṛṣh'ṭi[fp]' pāpāraṇ'ya davānalā ।

286. दौर्भाग्य तूलवातूला जराध्वान्त रविप्रभा ।
daur'bhāg'ya tūlavātūlā jarādh'vān'ta ravip'rabhā ।

287. भाग्याब्धि चन्द्रिका भक्त चित्तकेकि घनाघना ।
bhāg'yāb'dhi chan'drikā bhak'ta chit'takēki ghanāghanā ।

288. रोगपर्वत दम्भोलिर् मृत्युदारु कुठारिका ।
rōgapar'vata dam'bhōlir' mṛt'yudāru kuṭhārikā ।

289. महेश्वरी महाकाली महाग्रासा महाशना ।
mahēśh'varī mahākālī mahāg'rāsā mahāśhanā ।

290. अपर्णा चण्डिका चण्डमुण्डासुर निषूदिनी ।
apar'ṇā chaṇ'ḍikā chaṇ'ḍamuṇ'ḍāsura niṣhūdinī ।

291. क्षराक्षरात्मिका सर्व लोकेशी विश्वधारिणी ।
kṣharāk'ṣharāt'mikā sar'va lōkēśhī viśh'vadhāriṇī ।

292. त्रिवर्गदात्री सुभगा त्र्यम्बका त्रिगुणात्मिका ।
trivar'gadāt'rī subhagāt' tryam'bakāt' triguṇāt'mikā ।

293. स्वर्गापवर्गदा शुद्धा जपापुष्प निभाकृतिः ।
svar'gāpavar'gadā śhud'dhā japāpuṣh'pa nibhākṛtiḥi ।

294. ओजोवती द्युतिधरा यज्ञरूपा प्रियव्रता ।
ōjōvatīd' dyutidharā yaj'ñarūpāp' priyav'ratā ।

295. दुराराध्या दुराधर्षा पाटली कुसुम प्रिया ।
durārādh'yā durādhar'ṣhā pāṭalī kusumap' priyā ।

296. महती मेरुनिलया मन्दार कुसुम प्रिया ।
mahatī mērunilayā man'dāra kusumap' priyā ।

297. वीराराध्या विराड्रूपा विरजा विश्वतोमुखी ।
vīrārādh'yā virāḍ'rūpā virajā viśh'vatōmukhī ।

298. प्रत्यग्रूपा पराकाशा प्राणदा प्राणरूपिणी ।
prat'yag'rūpā parākāśhāp' prāṇadāp' prāṇarūpiṇī ।

www.saiveda.net

299. मार्ताण्ड भैरवाराध्या मन्त्रिणीन्यस्त राज्यधूः ।
mār’tāṇ’ḍa bhairavārādh’yā man’triṇīn’yas’ta rāj’yadhū-ḥu ।

300. त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा ।
tripurēśhī jayat’sēnā nis’traiguṇ’yā parāparā ।

301. सत्यं ज्ञानानन्द रूपा सामरस्य परायणा ।
sat’yaj’ jñānānan’da rūpā sāmaras’ya parāyaṇā ।

302. कपर्दिनी कलामाला कामधुक् कामरूपिणी ।
kapar’dinī kalāmālā kāmadhuk’ kāmarūpiṇī ।

303. कलानिधिः काव्यकला रसज्ञा रसशेवधिः ।
kalānidhi[hk]’ kāv’yakalā rasaj’ñā rasaśhēvadhiḥi ।

304. पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा ।
puṣh’ṭā purātanā pūj’yā puṣh’karā puṣh’karēk’ṣhaṇā ।

305. परंज्योतिः परंधाम परमाणुः परात्परा ।
parañ’jyōti[fp]’ paran’dhāma paramāṇu[fp]’ parāt’parā ।

306. पाशहस्ता पाशहन्त्री परमन्त्र विभेदिनी ।
pāśhahas’tā pāśhahan’trī paraman’tra vibhēdinī ।

307. मूर्ताऽमूर्ताऽनित्यतृप्ता मुनिमानस हंसिका ।
mūr’tā (a)mūr’tā (a)nit’yatṛp’tā munimānasa haṁ’sikā ।

308. सत्यव्रता सत्यरूपा सर्वान्तर्यामिनी सती ।
sat’yav’ratā sat’yarūpā sar’vān’tar’yāminī satī ।

309. ब्रह्माणी ब्रह्म जननी बहुरूपा बुधार्चिता ।
bram’hāṇīb’ bram’ha jananī bahurūpā budhār’chitā ।

310. प्रसवित्री प्रचण्डाऽऽज्ञा प्रतिष्ठा प्रकटाकृतिः ।
prasavit’rīp’ prachaṇ’ḍā (ā)j’ñāp’ pratiṣh’ṭhāp’ prakaṭākṛtiḥi ।

311. प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठ रूपिणी ।
prāṇēśh’varīp’ prāṇadāt’rī pañ’chāśhat’pīṭha rūpiṇī ।

312. विशृङ्खला विविक्तस्था वीरमाता वियत्प्रसूः ।
viśhṛṅ’khalā vivik’tas’thā vīramātā viyat’prasū-ḥu ।

313. मुकुन्दा मुक्तिनिलया मूलविग्रह रूपिणी ।
mukun’dā muk’tinilayā mūlavig’raha rūpiṇī ।

314. भावज्ञा भवरोगघ्नी भवचक्र प्रवर्तिनी ।
bhāvaj’ñā bhavarōgagh’nī bhavachak’rap’ pravar’tinī |

315. छन्दस्सारा शास्त्रसारा मन्त्रसारा तलोदरी ।
chhan’das’sārā śhās’trasārā man’trasārā talōdarī |

316. उदारकीर्तिरुद्दामवैभवा वर्णरूपिणी ।
udārakīr’tirud’dāmavaibhavā var’ṇarūpiṇī |

317. जन्ममृत्यु जरातप्त जनविश्रान्ति दायिनी ।
jan’mamṛt’yu jarātap’ta janaviśh’rān’ti dāyinī |

318. सर्वोपनिषदुद्घुष्टा शान्त्यतीत कलात्मिका ।
sar’vōpaniṣhadud’ghuṣh’ṭā śhān’tyatīta kalāt’mikā |

319. गम्भीरा गगनान्तस्था गर्विता गानलोलुपा ।
gam’bhīrā gaganān’tas’thā gar’vitā gānalōlupā |

320. कल्पना रहिता काष्ठाऽकान्ता कान्तार्ध विग्रहा ।
kal’panā rahitā kāṣh’ṭhā (a)kān’tā kān’tār’dha vig’rahā |

321. कार्यकारण निर्मुक्ता कामकेलि तरङ्गिता ।
kār’yakāraṇa nir’muk’tā kāmakēli taraṅ’gitā |

322. कनत्कनकता टङ्का लीला विग्रह धारिणी ।
kanat’kanakatā ṭaṅ’kā līlā vig’raha dhāriṇī |

323. अजा क्षयविनिर्मुक्ता मुग्धा क्षिप्र प्रसादिनी ।
ajāk’ kṣhayavinir’muk’tā mug’dhāk’ kṣhip’rap’ prasādinī |

324. अन्तर्मुख समाराध्या बहिर्मुख सुदुर्लभा ।
an’tar’mukha samārādh’yā bahir’mukha sudur’labhā |

325. त्रयी त्रिवर्गनिलया त्रिस्था त्रिपुरमालिनी ।
trayīt’ trivar’ganilayāt’ tris’thāt’ tripuramālinī |

326. निरामया निरालम्बा स्वात्मारामा सुधासृतिः ।
nirāmayā nirālam’bās’ svāt’mārāmā sudhāsṛtiḥi |

327. संसारपङ्क निर्मग्न समुद्धरण पण्डिता ।
saṁ’sārapaṅ’ka nir’mag’na samud’dharaṇa paṇ’ḍitā |

328. यज्ञप्रिया यज्ञकर्त्री यजमान स्वरूपिणी ।
yaj’ñap’riyā yaj’ñakar’trī yajamānas’ svarūpiṇī |

www.saiveda.net

329. धर्माधारा धनाध्यक्षा धनधान्य विवर्धिनी ।
dhar’mādhārā dhanādh’yak’ṣhā dhanadhān’ya vivar’dhinī ।

330. विप्रप्रिया विप्ररूपा विश्वभ्रमण कारिणी ।
vip’rap’riyā vip’rarūpā viśh’vabh’ramaṇa kāriṇī ।

331. विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरूपिणी ।
viśh’vag’rāsā vid’rumābhā vaiṣh’ṇavī viṣh’ṇurūpiṇī ।

332. अयोनिर्योनिनिलया कूटस्था कुलरूपिणी ।
ayōnir’yōninilayā kūṭas’thā kularūpiṇī ।

333. वीरगोष्ठीप्रिया वीरा नैष्कर्म्या नादरूपिणी ।
vīragōṣh’ṭhīp’riyā vīrā naiṣh’kar’myā nādarūpiṇī ।

334. विज्ञानकलना कल्या विदग्धा बैन्दवासना ।
vij’ñānakalanā kal’yā vidag’dhā bain’davāsanā ।

335. तत्त्वाधिका तत्त्वमयी तत्त्वमर्थ स्वरूपिणी ।
tat’tvādhikā tat’tvamayī tat’tvamar’thas’ svarūpiṇī ।

336. सामगानप्रिया सौम्या सदाशिव कुटुम्बिनी ।
sāmagānap’riyā saum’yā sadāśhiva kuṭum’binī ।

337. सव्यापसव्य मार्गस्था सर्वापद्विनिवारिणी ।
sav’yāpasav’ya mār’gas’thā sar’vāpad’vinivāriṇī ।

338. स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता ।
svas’thās’ svabhāvamadhurā dhīrā dhīrasamar’chitā ।

339. चैतन्यार्घ्य समाराध्या चैतन्य कुसुमप्रिया ।
chaitan’yār’ghya samārādh’yā chaitan’ya kusumap’riyā ।

340. सदोदिता सदातुष्टा तरुणादित्य पाटला ।
sadōditā sadātuṣh’ṭā taruṇādit’ya pāṭalā ।

341. दक्षिणा दक्षिणाराध्या दरस्मेर मुखाम्बुजा ।
dak’ṣhiṇā dak’ṣhiṇārādh’yā daras’mēra mukhām’bujā ।

342. कौलिनी केवलाऽनर्घ्य कैवल्य पददायिनी ।
kaulinī kēvalā (a)nar’ghya kaival’ya padadāyinī ।

343. स्तोत्रप्रिया स्तुतिमती श्रुति संस्तुत वैभवा ।
stōt’rap’riyās’ stutimatīśh’ śhruti saṁ’stuta vaibhavā ।

www.saiveda.net

344. मनस्विनी मानवती महेशी मङ्गलाकृतिः ।
manas'vinī mānavatī mahēśhī maṅ'galākṛtiḥi |

345. विश्वमाता जगद्धात्री विशालाक्षी विरागिणी ।
viśh'vamātā jagad'dhāt'rī viśhālāk'ṣhī virāgiṇī |

346. प्रगल्भा परमोदारा परामोदा मनोमयी ।
pragal'bhā paramōdārā parāmōdā manōmayī |

347. व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी ।
vyōmakēśhī vimānas'thā vaj'riṇī vāmakēśh'varī |

348. पञ्चयज्ञ प्रिया पञ्च प्रेत मञ्चाधिशा यिनी ।
pañ'chayaj'ñap' priyā pañ'chap' prēta mañ'chādhiśhāyinī |

349. पञ्चमी पञ्चभूतेशी पञ्च संख्योपचारिणी ।
pañ'chamī pañ'chabhūtēśhī pañ'cha saṅ'khyōpachāriṇī |

350. शाश्वती शाश्वतैश्वर्या शर्मदा शम्भुमोहिनी ।
śhāśh'vatī śhāśh'vataiśh'var'yā śhar'madā śham'bhumōhinī |

351. धरा धरसुता धन्या धर्मिणी धर्मवर्धिनी ।
dharā dharasutā dhan'yā dhar'miṇī dhar'mavar'dhinī |

352. लोकातीता गुणातीता सर्वातीता शमात्मिका ।
lōkātītā guṇātītā sar'vātītā śhamāt'mikā |

353. बन्धूक कुसुमप्रख्या बाला लीलाविनोदिनी ।
ban'dhūka kusumap'rakh'yā bālā līlāvinōdinī |

354. सुमङ्गली सुखकरी सुवेषाढ्या सुवासिनी ।
sumaṅ'galī sukhakarī suvēṣhāḍh'yā suvāsinī |

355. सुवासिन्यर्चन प्रीताऽऽशोभना शुद्धमानसा ।
suvāsin'yar'chanap' prītā (ā)śhōbhanā śhud'dhamānasā |

356. बिन्दु तर्पण सन्तुष्टा पूर्वजा त्रिपुराम्बिका ।
bin'du tar'paṇa san'tuṣh'ṭā pūr'vajāt' tripurām'bikā |

357. दशमुद्रा समाराध्या त्रिपुराश्री वशङ्करी ।
daśhamud'rā samārādh'yāt' tripurāśh'rī vaśhaṅ'karī |

www.vaidika.net

358. ज्ञानमुद्रा ज्ञानगम्या ज्ञानज्ञेय स्वरूपिणी ।
jñānamud'rāj' jñānagam'yāj' jñānaj'ñēyas' svarūpiṇī ।

359. योनिमुद्रा त्रिखण्डेशी त्रिगुणाम्बा त्रिकोणगा ।
yōnimud'rāt' trikhaṇ'ḍēśhīt' triguṇām'bāt' trikōṇagā ।

360. अनघाऽद्भुत चारित्रा वाञ्छितार्थ प्रदायिनी ।
anaghā (a)d'bhuta chārit'rā vāñ'chhitār'thap' pradāyinī ।

361. अभ्यासातिशय ज्ञाता षडध्वातीत रूपिणी ।
abh'yāsātiśhayaj' jñātā ṣhaḍadh'vātīta rūpiṇī ।

362. अव्याज करुणा मूर्तिर् अज्ञान ध्वान्त दीपिका ।
av'yāja karuṇā mūr'tiraj'ñānad' dhvān'ta dīpikā ।

363. आबाल गोप विदिता सर्वानुल्लङ्घ्य शासना ।
ābāla gōpa viditā sar'vānul'laṅ'ghya śhāsanā ।

364. श्रीचक्रराज निलया श्रीमत् त्रिपुरसुन्दरी ।
śhrīchak'rarāja nilayāśh' śhrīmat' tripurasun'darī ।

365. श्रीशिवा शिव शक्त्यैक्य रूपिणी ललिताम्बिका ।
śhrīśhivā śhiva śhak'tyaik'ya rūpiṇī lalitām'bikā ।

एवं श्रीललिता देव्या नाम्नां साहस्रकं जगुः ।
ēvaṁ' śhrīlalitā dēv'yā nām'nāṁ' sāhas'rakañ' jaguḥu ।

ॐ शान्तिः शान्तिः शान्तिः ॥
ॐ śhā-n'tiśh' śhā-n'tiśh' śhā-n'tiḥi ॥

www.saiveda.net